श्री मेधा दक्षिणामूर्ति मंत्रवर्णपद स्तुतिः

श्री मेधा दक्षिणामूर्ति मंत्रवर्णपद स्तुतिः

ओमित्येकाक्षरं ब्रह्म व्याहरंति त्रयः शिखाः |
तस्मै तारात्मने मेधादक्षिणामूर्तये नमः || 1 ||

नत्वायं मुनयः सर्वे परं यांति दुरासदं |
नकाररूपिणे मेधादक्षिणामूर्तये नमः || 2 ||

मोहजालविनिर्मुक्तो ब्रह्मविद्याति यत्पदं |
मोकाररूपिणे मेधादक्षिणामूर्तये नमः || 3 ||

भवमाश्रित्य यं विद्वान् नभवोह्यभवत्परः |
भकाररूपिणे मेधादक्षिणामूर्तये नमः || 4 ||

गगनाकारवद्भांतमनुभात्यखिलं जगत् |
गकाररूपिणे मेधादक्षिणामूर्तये नमः || 5 ||

वटमूलनिवासो यो लोकानां प्रभुरव्ययः |
वकाररूपिणे मेधादक्षिणामूर्तये नमः || 6 ||

तेजोभिर्यस्य सूर्योऽसौ कालक्लुप्तिकरो भवेत् |
तेकाररूपिणे मेधादक्षिणामूर्तये नमः || 7 ||

दक्षत्रिपुरसंहारे यः कालविषभंजने |
दकाररूपिणे मेधादक्षिणामूर्तये नमः || 8 ||

क्षिप्रं भवति वाक्सिद्धिर्यन्नामस्मरणान्नृणां |
क्षिकाररूपिणे मेधादक्षिणामूर्तये नमः || 9 ||

णाकारवाच्यो यः सुप्तं संदीपयति मे मनः |
णाकाररूपिणे मेधादक्षिणामूर्तये नमः || 10 ||

मूर्तयो ह्यष्टधा यस्य जगज्जन्मादिकारणं |
मूकाररूपिणे मेधादक्षिणामूर्तये नमः || 11 ||

तत्त्वं ब्रह्मासि परममिति यद्गुरुबोधितः |
सरेफतात्मने मेधादक्षिणामूर्तये नमः || 12 ||

येयं विदित्वा ब्रह्माद्या ऋषयो यांति निर्वृतिं |
येकाररूपिणे मेधादक्षिणामूर्तये नमः || 13 ||

महतां देवमित्याहुर्निगमागमयोः शिवः |
मकाररूपिणे मेधादक्षिणामूर्तये नमः || 14 ||

सर्वस्य जगतोह्यंतर्बहिर्यो व्याप्य संस्थितः |
ह्यकाररूपिणे मेधादक्षिणामूर्तये नमः || 15 ||

त्वमेव जगतः साक्षी सृष्टिस्थित्यंतकारणं |
मेकाररूपिणे मेधादक्षिणामूर्तये नमः || 16 ||

दामेति धातृसृष्टेर्यत्कारणं कार्यमुच्यते |
धांकाररूपिणे मेधादक्षिणामूर्तये नमः || 17 ||

प्रकृतेर्यत्परं ध्यात्वा तादात्म्यं याति वै मुनिः |
प्रकाररूपिणे मेधादक्षिणामूर्तये नमः || 18 ||

ज्ञानिनोयमुपास्यंति तत्त्वातीतं चिदात्मकं |
ज्ञाकाररूपिणे मेधादक्षिणामूर्तये नमः || 19 ||

प्रज्ञा संजायते यस्य ध्याननामार्चनादिभिः |
प्रकाररूपिणे मेधादक्षिणामूर्तये नमः || 20 ||

यस्य स्मरणमात्रेण नरो मुक्तः सबंधनात् |
यकाररूपिणे मेधादक्षिणामूर्तये नमः || 21 ||

छवेर्यन्नेंद्रियाण्यापुर्विषयेष्विह जाड्यतां |
छकाररूपिणे मेधादक्षिणामूर्तये नमः || 22 ||

स्वांतेविदां जडानां यो दूरे तिष्ठति चिन्मयः |
स्वाकाररूपिणे मेधादक्षिणामूर्तये नमः || 23 ||

हारप्रायफणींद्राय सर्वविद्याप्रदायिने |
हाकाररूपिणे मेधादक्षिणामूर्तये नमः || 24 ||

इति श्रीमेधादक्षिणामूर्ति मंत्रवर्णपद स्तुतिः ||